# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - ऐप्रिल, २०१९

**कक्षा**- आचार्यः (SEM-2) **प्रश्नपत्रम्-३** **गुणाः** - ७०

**विषयः** - रामानुजवेदान्तः **कोड- CC 425** **समयः** - ११ तः ०२

**दिनाङ्कः** - १२/०४/२०१९ **सन्दर्भग्रन्थः**- श्रीमद्भगवद्गीता (१६-१८ अध्यायाः) रामानुजभाष्यसहिता

---

**प्रथमान्वितिः**

**प्रश्नः - १ कस्यचिद् एकस्य व्याख्या यथाभाष्यं लेखनीया।** ०५

(१) दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव॥

(२) यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः।
न स सिद्धिमवाप्नोति न सुखं न परां शान्तिम्॥

**प्रश्नः - २ कस्यचिदेकस्य निबन्धात्मकमुत्तरं लिखत।** १०

(१) यथाभाष्यं दैवासुरसम्पद्विभागं प्रदर्शयत।

(२) दैवीसम्पदः वैशिष्ट्यानि निबध्नीत।

**द्वितीयान्वितिः**

**प्रश्नः - ३ कस्यचिद् एकस्य व्याख्या यथाभाष्यं विधेया।** ०५

(१) यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः।
दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्॥

(२) तस्मादोमित्युदाहृत्य यज्ञदानतपः क्रियाः।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्॥

**प्रश्नः - ४ कस्यचिदेकस्य निबन्धात्मकमुत्तरं लिखत।** १०

(१) त्रिविधां श्रद्धां यथाभाष्यं विवृणुत।

(२) गीतोक्तं त्रिविधं दानं भीष्मानुसारेण स्पष्टयत।

**तृतीयान्वितिः**

**प्रश्नः - ५ कस्यचिदेकस्य यथाभाष्यं व्याख्या विधेया।** ०५

(१) न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः॥

(२) अधिष्ठानं तथा कर्ता करणं च पृथग्विधम्।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम्॥

**प्रश्नः – ६  कस्यचिदेकस्य निबन्धात्मकमुत्तरं लेख्यम् ।** **१०**

(१) कर्मसन्न्यासं गीतोक्तदिशां विवृणुत ।

(२) ब्राह्मणादिवर्णानां स्वाभाविकं कर्म गीतानुसारेण प्रतिपादयत ॥

## चतुर्थान्वितिः

**प्रश्नः – ७  कस्यचिदकस्य यथाभाष्यं व्याख्या विधेया ।** **०५**

(१) श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

(२) मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं प्रतिजाने प्रियोऽसि मे ॥।

**प्रश्नः – ८  कस्यचिदेकस्य निबन्धात्मकमुत्तरं लिखत ।** **१०**

(१) ब्रह्मभूतस्य ज्ञानिनः स्थितिं यथाभाष्यम् उपनिबध्नीत ।

(२) श्रीकृष्णोपदेशं श्रुत्वा अर्जुनस्य ''करिष्ये वचनं तव'' इति स्थितिं विवृणुत ।

**प्रश्नः – ९  केषाञ्चन दशप्रश्नानाम् अतिलघूत्तराणि लिखत ।** **१०**

(१) तेजः क्षमा इति कीदृशी सम्पत् ?

(२) कामभोगार्थं के ईहन्ते ?

(३) श्रीभगवान् कान् आसुरीषु योनिषु क्षिपति ?

(४) कः सिद्धिं न अवाप्नोति ?

(५) कार्याकार्यव्यस्थायां किं प्रमाणम् अस्ति ?

(६) देवान् के यजन्ते ?

(७) सात्त्विकाहाराः के ?

(८) श्रद्धाविरहितः यज्ञः कीदृशः उच्यते ?

(९) कवयः कं सन्न्यासं विदुः ?

(१०) कर्मणः फलं कतिविधम् ? किं च तत् ?

(११) का बुद्धिः सात्त्विकी ?

(१२) सत्कारमानपूजार्थं क्रियमाणं तपः कीदृशम् ?

(१३) कृषिगौरक्ष्यवाणिज्यं कस्य कर्म ?

(१४) धनञ्जयः कः ?

(१५) कस्यप्रसादात् सञ्जयः श्रीकृष्णार्जुनसंवादं श्रुतवान् ?